# Skandaproktam Shivarchanopadesham

# સ્કન્દપ્રોક્તં શિવાર્ચનોપદેશમ્

## Document Information

Text title : Skandaproktam Shivarchanopadesham

File name : skandaproktaMshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 42 skandaproktaM shivaparvapUjAkathanam | 38-66||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 3, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)

શિવમિષ્ટ્વા નરઃ સોઽપિ પ્રયાતિ પરમાં ગતિમ્ ।
શિવં સર્વત્ર સમ્પૂજ્ય સવિશેષં સવિસ્તરમ્ ॥ ૩૮॥

અશ્વમેધાયુતં પુણ્યં લભતે નાત્ર સંશયઃ ।
સરિત્સમુદ્રતીરેષુ પર્વતેષુ વનેષુ ચ ॥ ૩૯॥

ગિરિકન્દરદુર્ગેષુ ગહ્વરેષુ વનેષુ ચ ।
પુષ્કરિણ્યાં તથાઽન્યત્ર તીર્થાયતનસંશ્રયે ॥ ૪૦॥

યત્ર વા રમતે બુદ્ધિસ્તત્રૈવ શિવમર્ચયેત્ ।
સર્વયજ્ઞેષુ યત્પુણ્યં લભતે નાત્ર સંશયઃ ॥ ૪૧॥

યઃ સમર્ચયતે ભક્ત્યા તસ્ય પુણ્યં તતોઽધિકમ્ ।
અતો વિનાપિ મન્ત્રેણ પુણ્યરાશિઃ પ્રકીર્તિતઃ ॥ ૪૨॥

સ્યાદયં મન્ત્રસંયુક્તઃ પુણ્યં શતગુણાધિકમ્ ।
તસ્માન્મન્ત્રેણ શર્વાય સ્નાનગન્ધફલાદિકમ્ ॥ ૪૩॥

ભૂમ્યશ્વરથવસ્ત્રં ચ હેમાદ્યાદિ નિવેદયેત્ ।
જપ્યો નમઃ શિવાયેતિ મન્ત્રઃ સર્વાર્થસાધકઃ ॥ ૪૪॥

સર્વમન્ત્રાધિકશ્ચાયમોઙ્કારાદ્યઃ ષડક્ષરઃ ।
શિવો નાન્તર્બહિર્યસ્માદ્ વ્યાપ્તં સર્વં ચરાચરમ્ ॥ ૪૫॥

જગદમિતિ યદ્બ્રૂતે તસ્માદોમિતિ સ સ્મૃતઃ ।
અયમર્થો હિ તિસૃભિર્માતૃભિઃ પરિગીયતે ॥ ૪૬॥

બ્રહ્મા હરિશ્ચ રુદ્રશ્ચ માતૃભિસ્તત્પ્રકીર્તિતાઃ ।
દક્ષિણાઙ્ગે ભવેદ્બ્રહ્મા હરિર્વામાઙ્ગસમ્ભવઃ ॥ ૪૭॥

હૃદયાન્નિર્ગતો રુદ્રો બ્રહ્મવિષ્ણુપ્રબોધકઃ ।

જગત્સૃષ્ટિકરો બ્રહ્મા વિષ્ણુર્લોકવિમોહનઃ ॥ ૪૮॥

અનુગ્રહપરો નિત્યં નીલરુદ્રઃ શિવાત્મકઃ ।
ત્રિભિરેતૈર્જગદ્વ્યાપ્તં કારણૈરાત્મમૂર્તિભિઃ ॥ ૪૯॥

શિવસ્ય માતરશ્ચૈતાઃ સર્વલોકપ્રપૂજિતાઃ ।
એતા એવ ત્રયો વેદાસ્ત્રયો લોકાસ્ત્રયો ગુણાઃ ॥ ૫૦॥

ત્રયોઽગ્નયઃ ત્રિવર્ગશ્ચ યચ્ચાન્યજ્જગતિ સ્થિતમ્ ।
અર્ધમાત્રાપરો રુદ્રઃ શિવઃ પરમકારાણઃ ॥ ૫૧॥

તસ્માદેતત્સમુત્પન્નં જગતઃ કારણત્રયમ્ ।
સર્વયજ્ઞપરઃ શુદ્ધો નમસ્કારો મહામખઃ ॥ ૫૨॥

નમસ્કારાત્મયજ્ઞેન તસ્માત્સમ્પૂજયેચ્છિવમ્ ।
અજ્ઞાનમશિવં ત્વસ્ય સર્વદુઃખાલયં યતઃ ॥ ૫૩॥

સ્વભાવાત્તદપાયો હિ તસ્માદ્રુદઃ પરઃ શિવઃ ।
નમઃ શિવાય શાન્તાય કારણત્રયહેતવે ॥ ૫૪॥

નિવેદયામિ ચાત્માનં મુક્ત્યૈ ચ પરમેશ્વરમ્ ।
ઉક્ત્વા નમઃ શિવાયેતિ મુચ્યતે સર્વબન્ધનાત્ ॥ ૫૫॥

યસ્માત્તસ્માત્સદા મન્ત્રમોઙ્કારાદ્યં મનું સ્મરેત્ ।
સર્વદા સર્વકાર્યેષુ ક્ષુતનિષ્ઠો વનાદિષુ ॥ ૫૬॥

ધન્યો નમઃ શિવાયેતિ ગિરમુક્ત્વા શિવં પદમ્ ।
યઃ સર્વવિત્પ્રબુદ્ધાત્મા પ્રાણાન્તે તુ સકૃત્સ્મરેત્ ॥ ૫૭॥

ભક્ત્યોં નમઃ શિવાયેતિ સ ગચ્છેત્પરમાં ગતિં ।
પાઠ્યેનાપિ નમસ્કારઃ પ્રયુક્તઃ શૂલપાણયે ॥ ૫૮॥

સંસારસ્થર્ણબન્ધાનામુચ્છેદનકરો ભવેત્ ।
અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોઽપિ વા ॥ ૫૯॥

યઃ સ્મરેત્સંયતો નિત્યં સ બાહ્યાભ્યન્તરઃ શુચિઃ ।
સ્મરણાદેવ રુદ્રસ્ય પાપસઙ્ઘાતજં પરમ્ ॥ ૬૦॥

શતધા ભેદમાયાતિ ગિરિર્વજહતો યથા ।
સર્વેષાં શિવભક્તાનામશેષાર્થપ્રસિદ્ધયે ॥ ૬૧॥

મન્ત્રમાહ શિવઃ સાક્ષાદશેષાર્થનિબન્ધનમ્ ।
સદ્બીજં સર્વવિદ્યાનામાદ્યં બ્રહ્મ પરાત્પરમ્ ॥ ૬૨॥

સર્વસાધનકો મન્ત્રઃ શિવસૂત્રં ષડક્ષરઃ ।
તસ્માદનેન મન્ત્રેણ પ્રકુર્વીત શિવાર્ચનમ્ ॥ ૬૩॥

તત્ર દેશે ન દુર્ભિક્ષં ન ચ મારી પ્રવર્તતે ।
નાકાલે મ્રિયતે કશ્ચિત્ પૂજ્યતે યત્ર શઙ્કરઃ ॥ ૬૪॥

દીક્ષિતઃ સૂત્રમન્ત્રજ્ઞો યોઽર્ચયેત્તુ સદાશિવમ્ ।
સ ચ યત્ફલમાપ્નોતિ તદેકાગ્રમનાઃ શ‌ૃણુ ॥ ૬૫॥

ઈશ્વર ઉવાચ ।

યઃ પૂજયેચ્છશિકલાઽમલમૌલિ લિઙ્ગં
ભસ્માક્ષધૃત્ પ્રથિતપર્વસુ શર્વમેકમ્ ।
સર્વૈશ્ચ પાતકવરૈઃ સ વિમુક્ત ઈશે
સંસારઘોરવિષસર્પમુખાભિલગ્નઃ ॥ ૬૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । અધ્યાયઃ ૪૨ સ્કન્દપ્રોક્તં શિવપર્વપૂજાકથનમ્ । ૩૮-૬૬॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 42 skandaproktaM shivaparvapUjAkathanam . 38-66..

Proofread by Ruma Dewan

*Skandaproktam Shivarchanopadesham*
pdf was typeset on November 3, 2024

Please send corrections to *sanskrit@cheerful.com*